# बौद्धदर्शनविकासाय महाकवेरश्वघोषाचार्यस्ययोगदानम्

**सोमनाथशर्मा**
उपप्राध्यापकः, बौद्धदर्शनविभागः, नेपालसंस्कृतविश्वविद्यालयः, वाल्मीकिविद्यापीठम्।
Email: sharmasom545@gmail.com
https://doi.org/10.3126/haimaprabha.v23i1.66740

***सारसङ्क्षेपः***

आचार्याश्वघोषः महान् दार्शनिकः, सङ्गीतज्ञः, नाटककारः, महाकविश्चासीत् । महाकवेरश्वघोषस्य जीवनवृत्तविषये चीनतिब्बतादिषु बौद्धदेशेषु पर्याप्तरूपेण सामग्र्यः प्राप्यन्ते । महाकवेरश्वघोषस्य जीवनवृत्तमाधारीकृत्य रचितस्य सौन्दरनन्दमित्यस्य ग्रन्थस्यावलोकनेन ज्ञायते यदयं महाकवि अश्वघोषः महापण्डित–महाराजेत्यादिभिः उपाधिभिरलङ्कृत इति। महाकवेरश्वघोषस्य नामकरणविषये प्रामाणिकरूपेण कुत्राप्य' ल्लेखो न प्राप्यते,तथापि अनेकैराचार्यैः इदं भवितुं शक्नोति वेति रूपेणैव नामकरणं कृतं दृश्यते। महाकवेरश्वघोषस्य कृतिषु मध्ये बुद्धचरित–सौन्दरनन्द–बज्रसूचीप्रभृतयः ग्रन्थाः मुख्याःमन्यन्ते आचार्याः । केषाञ्चन विदुषां मतं वर्तते यत् अयमश्वघोषः महायानसम्प्रदायस्य तत्सिद्धान्तस्य च प्रचारक आसीदिति। तिब्बतीपरम्परायामयं सर्वास्तिवादित्वेन स्वीक्रियते । एतेन अश्वघोषः हीनयानसम्प्रदायस्य वर्तत इति ज्ञायते । अयमालेख आगमनविधिमवलम्ब्य प्रस्तुतो विद्यते। बौद्धदर्शनविकासाय महाकवेरश्वघोषस्य योगदानं तत्कृतीनांच वैशिष्ट्यं प्रतिपाद्यान्त्ये निष्कर्षः प्रदत्तः वर्तते । अस्मान्निष्कर्षाद्बौद्धदर्शनक्षेत्रे अश्वघोषस्य योगदानविषयकचिन्तने सारल्यं भविष्यतीत्यपेक्ष्यते।
शब्दकुञ्जी – आन्वीक्षिकी, त्रिपिटक, महायानम्, सर्वास्तिवादः, हीनयानम्, ।

## विषयपरिचयः

महायानबौद्धधर्मस्य साहित्यं तु बौद्धसंस्कृतसाहित्यनाम्ना अवगन्तुं शक्यते । महायानसिद्धान्तानां यावन्तोऽपि ग्रन्थाः सन्ति, ते सर्वेऽपि ग्रन्थाः पालीभाषायां सन्तीति केचन कथयन्ति । वस्तुतः तन्न समीचीनम्। यतो हि ते सर्वेऽपि ग्रन्था आंशिकरूपेण संस्कृतभाषायामेवासन् इति। महावस्तु–ललित–विस्तर–दिव्यावदानादिषु ग्रन्थेषु या भाषावर्तते तां भाषां दृष्ट्वा अस्माभिरनुमानं कर्तुं शक्यते यत् महायानसिद्धान्तस्य भाषा संस्कृतमेवासीदिति । प्रारम्भकाले बौद्धधर्मस्य मूलतः विभागद्वयमासीत् । एकः स्थेरवादः अन्य महासांघिक इति। वस्तुतः भगवतः बुद्धस्य य उपदेश आसीत् तस्योपदेशस्य यत् सारतत्त्वं वर्तते तत्तु कैश्चिद् अपि शिष्यैः न गृहीतं न बुद्धं वेति। अनेकैः शिष्यैः विभिन्नरूपेण बुद्धोपदेशस्य प्रतिपादनं कृतम्। अत एव

बौद्धधर्मे अनेकाः चर्चा परिचर्चाश्च दृश्यन्ते । यतः संस्कृतसाहित्याकाशपरम्परायाम् अन्येषां बौद्धमहाकवीनामपेक्षया महाकविरश्वघोषः उत्कृष्टः शीर्षस्थश्च वर्तते । पाश्चात्यविदुषः सैम्युअलबिलमहोदयस्य बुद्धचरितम् इति ग्रन्थे महाकवेरश्वघोषस्य विषये सम्यक्रूपेण चर्चा कृता वर्तते । तेन च विदुषा अयमेव अश्वघोषः महान् दार्शनिक आसीदिति प्रतिपादितम् । बीलमहोदयानन्तरमपि बहवः दार्शनिकाः आगताः । तैः सर्वैरपि बौद्धधर्मस्य प्रतिपादनपुरस्सरमाचार्यस्य महाकवेरश्वघोषस्य विषये चर्चा कृता वर्तते । अस्यानुसन्धानकार्यस्य क्षेत्रं बौद्धदर्शनमस्ति चेत् अश्वघोषरचितकृतीनां वैशिष्ट्यप्रतिपादनं सीमा वर्तते । बौद्धदर्शनप्रवर्द्धनायाश्वघोषाचार्येण कीयत्कार्यं सम्पादितमिति समस्यायाः समाधानान्वेषणमेवास्यालेखस्येद्देश्यं विद्यते । अश्वघोषस्य विषये बहुरध्ययनं नैव दृश्यते अतस्तदभावं पूत्यर्थं तथा बौद्धदर्शनविकासाय खलु अश्वघोषस्य योगदानं तद्विरचितानां कृतीनां वैशिष्ट्यं च सम्प्रत्यस्मिन् आलेखे प्रस्तूयते ।

## अध्ययनविधिः

प्रस्तुतोऽयमालेखः *निगमनविधिमवलम्ब्यैव* निर्मितः । तत्रबौद्धदर्शनस्य संस्कृतमूलकाः ग्रन्था एव प्राथमिकसामग्रीत्वेन प्रयुक्ताः वर्तन्ते । तदतिरिच्य आंशिकरूपेण नैकविधप्रतीच्यप्राच्यविद्याविशारदैः विद्वद्भिस्सह संवादादिकं विधाय च सामग्रीसङ्कलनं विहितं वर्तते । सङ्कलितसामग्रीभ्यः प्राप्ततथ्यानां विश्लेषणं कृत्वा निष्कर्षः प्रस्तुतो वर्तते ।

## सैद्धान्तिकाधारः

आलेखेऽस्मिन् बौद्धदर्शनसम्बद्धग्रन्थानुसारेण महाकवेरश्वघोषाचार्यस्य योगदानं तत्कृतीनाञ्च वैशिष्ट्यं प्रतिपादितं वर्तते । अश्वघोषस्य कृतिसु बौद्धदर्शनसिद्धान्तं मूलरूपेण प्रतिपादितं वतर्ते । तदेव सिद्धान्तमवलम्ब्य लेखेऽस्मिन्नश्वघेषस्य कृतीनां विश्लेषणं विहीतम् । सम्बद्धमूलग्रन्था हिन्द्यादिभाषास्वनूदितग्रन्थाश्च सैद्धान्तिकाधाररूपेणात्र गृहीताः सन्ति । एवंविधसैद्धान्तिकाधारमवलम्ब्य बौद्धदर्शनविकासाय संरक्षणाय च महाकवेरश्वघोषाचार्यस्य योगदानं तत्कृतीनाञ्च वैशिष्ट्यं प्रस्तुतमत्रालेखे । प्रविध्यादिविषयसन्दर्भे प्रचलिताया (एपीए) पद्धतेरवलम्बनं कृतं विद्यते ।

## विश्लेषणप्रक्रिया

बौद्धदर्शनविकासाय महाकवेरश्वघोषाचार्यस्य योगदानविषयकशीर्षकमाहत्य अयमालेखः प्रस्तुतः । अस्यालेखस्य पूर्णतायै बौद्धदर्शनग्रन्थाः सङ्कलिताः । तत्र बौद्धदर्शनविकासाय संरक्षणाय चाश्वघोषाचार्यविषयकसङ्क्षिप्तपरिचयस्तावत् प्रथमं प्रतिपादितम् । ततः सौन्दरनन्दबुद्धचरितादिग्रन्थेषु प्रतिपादितविषयान् विश्लिष्यान्त्ये निष्कर्षः प्रस्तुतोऽस्ति ।

**महाकविरश्वघोषस्य परिचयः**

बौद्धधर्मदर्शनस्येतिहासो दृश्यते चेत्तत्र मौर्यवंशी सम्राट् एवं कुषाणवंशी सम्राट् कनिष्कश्चोभयोः नाम विशेषरूपेण वर्णितं वर्तते । यतो हि उभयोरपि प्रयासद्वारा बौद्धधर्मस्य प्रभावः सर्वत्राऽपि देशे प्रसृतो वर्तते । अत एव विश्वेऽस्मिन् बौद्धधर्मस्य प्रभावः सम्यक्तया द्रष्टुं शक्यते । किं बहुना ! बौद्धधर्मस्तावत् विश्वधर्मनाम्नाऽपि ज्ञातुं शक्यते । बौद्धधर्मस्य मार्गद्वयं वर्तते – हीनयानं महायानञ्चेति । उपर्युक्तयोः द्वयोः राज्ञोः मध्ये कनिष्कः नृपः महायानबौद्धधर्मं प्रति आबद्धो दृश्यते । तेन च राज्ञा महायानविषये किं किं प्रतिपादितमिति तु तत्तद्ग्रन्थाध्ययनेन सम्यक्तया ज्ञातुं शक्नुमः । अन्यच्च नृपः अश्वघोषस्तु महान् दार्शनिकः, सङ्गीतज्ञः, नाटककारः, महाकविश्च आसीत् । सम्राट् अशोकोऽपि बौद्धधर्मावलम्बी आसीत् । बौद्धर्धस्य प्रचाराय प्रसाराय च महान् प्रयासो विहितः अनेनेति । यत् कार्यम् अशोकेन न कृतमर्थात् अवशिष्टं यत् कार्यमासीत् तत् सर्वमपि महाकविना अश्वघोषेण कृतमिति । अन्यच्च कनिष्कनृपेण बौद्धधर्मस्य प्रचारार्थं न केवलं भिक्षुभ्यः उपदेशः कृतोऽपि तु स्वयमेव वैवाहिकसम्बन्धद्वारा अस्य धर्मस्य विदेशेष्वपि प्रचारः कृतः । यद्यपि अशोकेन वियतनामदेशः, थाइल्याण्डदेशः, इन्डोनेशियादेशश्चेत्यादिषु स्थलेषु बौद्धधर्मस्य प्रचारः कृतः । एवमेव यवनदेशे नेपालदेशेऽपि अस्य धर्मस्य प्रचारः सम्यक्तया कृतः । एवञ्च श्रीलङ्कादेशेऽपि बौद्धधर्मस्य प्रभावः द्रष्टुं शक्यते । तच्च कार्यमनेनैव अशोकेन कृतमिति तु नास्ति संशीतिगन्धः।

परवर्तिकाले कनिष्कद्वाराऽपि बौद्धधर्मस्य प्रचाराय महान् यत्नः विहितः । अनेन कनिष्केण नृपेण चीनदेशादिषु अस्य धर्मस्य प्रचारः कृतः । एतावतापि बौद्धधर्मस्य प्रचारः प्रसारश्च सम्यक्रूपेण न जातो वेति मनसि सन्देहः जातः । तदनन्तरमाचार्येण अश्वघोषेण बौद्धधर्मस्य एका सभा आयोजिता । तत्र सभायां बौद्धधर्मविदुषां दार्शनिकानाञ्च उपस्थितिरासीत् । तदनन्तरं सभाद्वारा बौद्धधर्मस्य विविधपक्षविषये समीक्षणं कृतम् । महाकविना अश्वघोषेण स्वस्य सङ्गीतकलाद्वारा स्वप्रतिभाद्वारा च तस्मिन् समये तत्तत्क्षेत्रे बौद्धधर्मस्य प्रभावविषये उपदेशः प्रदत्तः । ब्राह्मणधर्मस्य बौद्धधर्मस्य च मध्ये यः कोऽपि विरोध आसीत्, तस्य सर्वस्यापि विरोधस्य समाधानाय प्रयासः कृतः । भगवान् बुद्धोऽपि भगवतः विष्णोः अवतार आसीदित्यपि अनेनैव अश्वघोषेण प्रचारः कृतः । एतावता ब्राह्मणधर्मे प्रचलिता भक्तिः बौद्धजगत्यपि प्रचारिता इति तु तत्तत्प्रकरणे द्रष्टुं शक्नुमः । किं बहुना बुद्धो भगवान् विष्णोः अवतारो वर्तत इति तु पुराणादिष्वपि चर्चा परिदृश्यते । महायानबौद्धधर्मस्य साहित्यं तु बौद्धसंस्कृतसाहित्यनाम्ना अवगन्तुं शक्यते । महायानसिद्धान्तानां यावन्तोऽपि ग्रन्थाः सन्ति, ते सर्वेऽपि ग्रन्थाः पालीभाषायां सन्तीति केचन कथयन्ति । वस्तुतः तन्न समीचिनम् । यतो हि ते सर्वेऽपि ग्रन्था आंशिकरूपेण संस्कृतभाषायामेवासन् इति । महावस्तु–ललित– विस्तर–दिव्यावदानादिषु ग्रन्थेषु या भाषा, वर्तते तां भाषां दृष्ट्वा अस्माभिः अनुमानं कर्तुं शक्यते यत् महायानसिद्धान्तस्य भाषा संस्कृतमेव आसीदिति । यतः संस्कृतसाहित्याकाशपरम्परायाम् अन्येषां वौद्धमहाकविनामपेक्षया महाकविरश्वघोषः उत्कृष्टः शीर्षस्थश्च वर्तते । पाश्चात्यविदुषः सैम्युअलबिलमहोदयस्य बुद्धचरितम् इति ग्रन्थे महाकवेरश्वघोषस्य विषये सम्यक्रूपेण चर्चा कृता वर्तते । तेन च विदुषा अयमेव अश्वघोषः महान् दार्शनिकः

आसीदिति प्रतिपादितम् । बीलमहोदयानन्तरमपि बहवः दार्शनिकाः आगताः । तैः सर्वैरपि बौद्धधर्मस्य प्रतिपादनपुरस्सरमाचार्यस्य महाकवेरश्वघोषस्य विषये चर्चा कृता वर्तते ।

अश्वघोषस्य कृतीनां खलु अवलोकनेनास्माभिर्ज्ञातुं शक्यते यदस्य विदुषः प्रतिभा कीदृशी आसीदिति । एतावता ज्ञायते यत् अयं धर्मप्रचारकः बौद्धभिक्षुः आसीदिति । डा. विमलचरणलाहामहोदयेन अश्वघोष इत्यस्मिन् ग्रन्थे आचार्यस्य अश्वघोषस्य मूलस्रोतविषये बहु चर्चितं वर्तते । तच्च संस्कृतभाषायां तिब्वतीभाषायाञ्च वर्तत इति प्रतिपादितम् (लाहा, सन् १९४६, पृ.१) । अत एव बौद्धधर्माचार्याणां अश्वघोषप्रभृतीनामाचार्याणां विषये ज्ञानं प्राप्तुमसमर्थाः भविष्यामः । महाकवेरश्वघोषस्य जीवनवृत्तविषये चीनतिब्वतादिषु बौद्धदेशेषु पर्याप्तरूपेण सामग्र्यः प्राप्यन्ते । अस्य मूलकारणन्तु अश्वघोषस्य सर्वा अपि कृतयः न संस्कृतभाषायां सुरक्षिताः सन्ति, अपितु चीनीभाषायां तिब्वतीभाषायाञ्च सुरक्षिताः दृश्यन्ते (लाहा, सन् १९४६, पृ.१) । महाकवेरश्वघोषस्य जीवनवृत्तमाधृत्य रचितस्य सौन्दरनन्दमित्यस्य ग्रन्थस्यावलोकनेन ज्ञायते यदयं महाकविरश्वघोषः महावादी–महापण्डित–महाराजेत्यादिभिः उपाधिभिरलङ्कृत इति । एवञ्चायं साकेतप्रदेशस्य निवासी आसीदित्यपि ज्ञायते । बुद्धचरितस्य ग्रन्थस्य तिब्वतीभाषायामनुदितव्याख्याद्वारापि ज्ञातुं शक्यते यत् अश्वघोषः साकेतप्रदेशस्य निवासी आसीदिति । महाकवेरश्वघोषस्य मातुः पितुश्च विषये एवं जन्मस्थानविषये विदुषामैकमत्याभावात् नैकविधा भणितिः प्रचलिता वर्तते । केषाञ्चन विदुषां मतं वर्तते यत् अश्वघोषस्य जन्म पश्चिमभारते जातम् इति । एवञ्च लोकनाम्नः पुरुषस्य गृहे ‘घोणा’ इति नामिकायाः स्त्रियः गर्भतः जन्म जातमिति कथनं वर्तते । अन्ये च केचन कथयन्ति यत् संघगुह्यनामकस्य धनाढ्यब्राह्मणस्य गृहे अस्य जन्म जातमिति कथयन्ति । परन्तु सौन्दरनन्द–बुद्धचरित–शारिपुत्रप्रकरणैः ज्ञातुं शक्यते यत् भिक्षोः भदन्तमहाकवेः जन्म सुवर्णाक्षीदेव्याः गर्भतः जातमिति । एवमयमश्वघोषः साकेतनिवासी च आसीदिति ज्ञायते । उपर्युक्तेषु त्रिषु कथनेषु मध्ये आद्यद्वयं न तावद् प्रामाणिकं वर्तते । अन्तिमं कथनन्तु प्रामाणिकमेवेत्याचार्यैः प्रतिपादितं विश्लिष्टञ्च वर्तते । सौन्दरनन्दमहाकाव्यस्य द्वितीयसर्गस्य कश्चन श्लोको वर्तते, तेन च श्लोकेन अस्माभिर्ज्ञायते यदयं महाकविरश्वघोषः साकेतनिवासी आसीदिति (सौन्दरनन्दमहाकाव्यम्,२।६२) । यद्यपि पितुर्नामविषये उल्लेखो न प्राप्यते तथापि साकेतनिवासी आसीदिति तु स्पष्टं वर्तते खलु । अन्यच्च सौन्दरनन्दे उक्तं वर्तते यत्

तयोः सत्पुत्रयोर्मध्ये शाक्यराजो रराजसः ।
मध्यदेशे इव व्यक्तो हिमवत्पारिपात्रयोः ॥ (सौन्दरनन्दमहाकाव्यम्,२।६२ )

अनेनापि ज्ञायते अयं साकेतनिवासी अथवा मध्यदेशनिवासी च वर्तत इति । मध्यदेशस्य सीमा विषये मनुस्मृतौ मनुना उल्लिखितं वर्तते यत् –

हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि ।
प्रत्यगेव प्रयागस्य मध्यदेशः प्रकीर्तितः ॥ (मनुस्मृतिः,२।२१)

उपर्युक्तेन इदं स्पष्टं भवति यद् महाकवेरश्वघोषस्य मातुः नाम सुवर्णाक्षी एव आसीदिति । एवञ्च जन्मस्थानं मध्यदेशस्था साकेतनगरी एवासीदीति । एतस्मिन्नेव विषये पाटलिपुत्रस्थविदुषामपि इयमेव भणितिः

वर्तते । तिब्बतीदेशस्थेन तारानाथमहोदयेन उक्तं वर्तते यत् अश्वघोषः मातृचेटश्च उभावपि एकस्मिन्नेव स्थाने तिष्ठतः स्म । मातृचेटस्तु पाटलिपुत्रनगरे निवसति स्म इति व्याख्यानं कृतं दृश्यते । अत एव अश्वघोषोऽपि पाटलिपुत्रनिवासी एव वर्तते । महामहोपाध्यायस्य राहुलसांकृत्यायनस्य कथनानुसारेणाश्वघोषस्य प्रेमिकायाः नाम प्रभा आसीदिति ज्ञायते । इयमेव प्रभा अश्वघोषस्य कृते लेखनकार्यादिषु उत्प्रेरिका आसीत् (सांकृत्यायनः, सन् १९६६, पृ. १३३) ।

**महाकवेरश्वघोषस्य नामकरणम्**

महाकवेरश्वघोषस्य नामकरणविषये प्रामाणिकरूपेण कुत्रापि उल्लेखो न प्राप्यते । तथापि अनेकैराचार्यैः इदं भवितुं शक्नोति वेति रूपेणैव नामकरणं कृतं दृश्यते । वस्तुतः वेदव्यासमहर्षिवाल्मीकिप्रभृतिभिः आचार्यैः दार्शनिकैर्वा बहवः ग्रन्थाः रचिताः । तत्र रचितेषु ग्रन्थेषु न कुत्रापि तैः स्वनामविषये उल्लेखः कृतो दृश्यते । तत्तु स्वभाविकमेव । अयमेव मार्ग आचार्येणाश्वघोषेणापि अनुश्रितो दृश्यते । यदा बौद्धधर्मस्य दीक्षा गृहीता तस्मिन् समये अस्य अश्वघोष इति नामकरण कृतं स्यात् । विषयेऽस्मिन् सर्वेषामाचार्याणां मतभेदो दरीदृश्यते । तत्र केचन कथयन्ति यस्मिन् दिने महाकवेः जन्म जातं तस्मिनेव दिने अश्वानां घोषः जातः स्यात् अतोऽस्य नाम अश्वघोषः कृतं स्यात् । कुत्रचित् अश्वघोषस्य कृते घोरविन् इति नाम्ना प्रयोगः कृतो दृश्यते (उपाध्यायः, सन् १९५४, पृ. ६५९) । अन्यच्च यथाश्वानां गर्जनेन सर्वेषां जनानां ध्यानाकर्षणं भवति, तथैव अनेनापि अश्वगर्जनमिव बौद्धधर्मस्य प्रचाराय महान् उद्घोषः कृतः स्यात् । अत एव अस्य नाम अश्वघोष इति प्रसिद्धम् । एतावता महाकवेश्वघोषस्य नामकरणविषये चर्चा कृता ।

**महाकवेरश्वघोषस्य कालनिर्धारणम्**

प्राचLनकाले केनापि कविना विदुषा वा स्वस्य कालनिर्धारणविषये न किमपि उच्यते स्म । अत एव अस्माकं कृते कविनां विदुषां वा कालनिर्धारणं कर्तुं दुष्करं भवति । महाकवेरश्वघोषस्य समयः क इति विषये सर्वेषां विदुषां मतभेदो दरीदृश्यते । यतोऽहि समीक्षकाणामस्मिन् विषये मतैक्याभावात् कालनिर्धारणं दुष्करम्, तथापि येन केनापि प्रकारेण कालनिर्धारणं कर्तव्यं भवति । बौद्धवाङ्मयस्येतिहासं दृष्ट्वा सङ्क्षिप्तरूपेण विवरणं दातव्यम् । अतोऽश्वघोषस्य कालविषये निम्नानुसारेण विचारः प्रतिपाद्यते–

१. दिव्यवदानस्यानुसारेण बुद्धचरिते अशोकेन अशीतिसहस्रसङ्ख्यात्मकस्तूपानां निर्माणं कृतमिति उल्लेखो वर्तते । (बुद्धचरितम्,२८।६५) । दिव्यावदानस्य रचनाकालस्तु ईशापूर्वं १५०शताब्द्यामिति दृश्यते । परन्तु जानस्टानमहोदयेन अस्य कालः ई.पू. ५०शताब्द्यां स्वीकृतो वर्तते । इमं तर्कमाधारीकृत्य वक्तुं शक्यते यत् अशोकस्यानन्तरमेव अश्वघोषस्य समय इति ।

२. चीनीभाषायां तिब्बतीभाषायां च रचितानां साहित्यानामध्ययनेन ज्ञायते यत् अयमश्वघोषः कनिष्कस्य राज्यसभायां न केवलं राज्यकवित्वेनापितु राजगुरुत्वेनापि प्रतिष्ठित आसीत् । कनिष्कस्य कालस्तु ई.पू. ५०शताब्द्यामासीत् इति । एतावतापि ज्ञायते अयमश्वघोषः नृपस्य कनिष्कस्य समकालीन आसीदिति ।
३. अश्वघोषः नागार्जुनस्य पूर्ववर्ती आसीत् । नागार्जुनस्य समयस्तु ईशायाः द्वितीयशताब्द्यामासीदिति सर्वसम्मतोऽयं विषयः । नागार्जुनः सातवाहननृपस्य मित्रमासीत् । अयं च नागार्जुनः गौतमीपुत्रस्य यज्ञश्रीनामकस्य समकालीन आसीत् । वापटमहोदयेन नागार्जुनस्य समयः ईशातः १९६शताब्द्या मध्यकालीनः वर्णितः (वापटः, सन् १९९७, पृ.१६०) । एतावता अश्वघोषस्य समयः प्रथमशताब्द्यामासीदिति स्पष्टं भवति ।
४. डा. विमलचरणलाहामहोदयेन रचितस्य अश्वघोषनामकस्य ग्रन्थस्य लेखनकाले तत्र अश्वघोषमहोदयस्य कालः विविधरूपेण प्रतिपादितो दृश्यते । एवञ्च न केवलं एकः अश्वघोषः अपि तु त्रयः अश्वघोषा आसन् इति प्रतिपादितम् । प्रथमस्य अश्वघोषस्य समयः बुद्धस्य महापरिनिर्वाणस्य ३००–३७५ वर्षानन्तरं स्वीकृतः । अयमेव महायानसूत्रालङ्कारशास्त्रस्य कर्ता आसीदिति । द्वितीयस्तु हीनयानसम्प्रदायस्य आचार्य आसीत् । अस्य समयस्तु बुद्धस्य महापरिनिर्वाणस्य ४००वर्षानन्तरमासीदिति । तृतीयस्य अश्वघोषस्य कालस्तु बुद्धस्य महापरिनिर्वाणस्य ५००–६०० वर्षानन्तरमासीत् । अयं च महायानश्रद्धोत्पादशास्त्रस्य रचयिता आसीदिति । तारानाथमहोदयेनापि त्रयाणामेव अश्वघोषाणां चर्चा कृता वर्तते । नागार्जुनेन तु षड् अश्वघोषाः आसन् इति उच्यते ।
५. अश्वघोषस्य समयः कालीदासात् पूर्वमेवासीत् । तच्च अश्वघोषस्य लेखनशैलीं दृष्ट्वा ज्ञातुं शक्यते । कालीदासस्तु गुप्तकालीनकविः वर्तत इति कथयन्ति जनाः । अत एव निश्चप्रचमिदं वक्तुं शक्यते यत् आचार्यः महाकविः अश्वघोषः कालिदासात् २००–३०० वर्षपूर्वमासीदिति । आचार्यभासोऽपि अस्यैवानुकरणं करोति । एतावता अपि अस्माभिः ज्ञातुं शक्यते यदयमश्वघोषः कौटिल्यस्य निकटवर्ती आसीदिति (आचार्यः,सन् १९७१,पृ.१३७) । पूर्वोक्तकथनानुसारेण अश्वघोषः प्रथमशताब्द्यामेव आसीत् । एवञ्च कनिष्कस्य समकालीन अथवा किञ्चित् पूर्ववर्ती चासीदिति स्पष्टं ज्ञातुं शक्यते । परन्तु विषयेऽस्मिन् विदुषां मतैक्यं नास्ति । अश्वघोषस्य कालविषयकचिन्तने विविधानि मतानि प्रदर्शितानि । एवञ्च अश्वघोषः एकः आसीत् उत त्रयः अश्वघोषा आसन् उत षडश्वघोषा आसन्नित्यादिषु विषयेषु बहुचर्चा विहिता । वस्तुतः बलदेवोपाध्यायनेन अश्वघोषस्य प्रादुर्भावः महर्षेः वाल्मीकेः अनन्तरं महाकवेः भासस्य कालिदासस्य च पूर्वं कुषाणवंशे कनिष्कस्य काले जात इत्युच्यते (उपाध्यायः, सन् १९५४, पृ.६५९) । येन च अश्वघोषेण बुद्धचरित–सौन्दरनन्द–शारिपुत्रप्रकरणादीनां ग्रन्थानां रचना कृतासीत् । इदञ्च सर्वसम्मतमेवेति ।

**महाकवेरश्वघोषस्य कृतयः**

महाकविः अश्वघोषः बौद्धवाङ्मयस्य उत्कृष्टो विद्वान् आसीत् । अस्य विद्वत्ताविषये बहवः जनाः प्रभाविताः सन्ति । एवमनेकासु परम्परासु अपि अस्य विषये बहवः विचाराः प्रस्तुताः दरीदृश्यन्ते । महाकवेरश्वघोषस्य कृतिषु मध्ये बुद्धचरित–सौन्दरनन्द–बज्रसूचीप्रभृतयः ग्रन्थाः सर्वोत्कृष्टा मन्यन्ते आचार्याः

दार्शनिकाश्च । अनेन बौद्धदर्शनमार्गे एव स्वजीवनं यापितम् अर्थात् चरथ भिक्खवे चारिकं बहुजनहिताय बहुजनसुखायैव स्वस्य जीवनं प्रवाहितं कृतम् । एवञ्च मोक्षोपाय कः ? धर्मनीतिः का ? साहित्यं किम् ? काव्यं वा किम् ? इत्यादिषु विषयेषु अनेन जनान् बोधयितुं महान् प्रयासः विहितः । सांसारिकजीवनस्य अतिसूक्ष्मं तत्त्वं किमिति विषये गहनं चिन्तनं दरीदृश्यते । तत्तु तत्तत्ग्रन्थानां सूक्ष्माध्ययनेन ज्ञायते । आचार्यः अश्वघोषः उत्कृष्टः कविश्चासीत् । इदानीमस्य कवेः कृतयः कति सन्तीति विषये चर्चा क्रियते । यद्यपि अस्मिन् विषये स्पष्टतः न किमपि वक्तुं सहजं वर्तते । तथापि बौद्धवाङ्मयपरम्परास्वस्य कृतीनां सङ्कलनमुपलभ्यते । तच्च निम्नानुसारेण प्रस्तूयते –

## महायानश्रद्धोत्पादशास्त्रम्

इदञ्चमहायानश्रद्धोत्पादशास्त्रं महाकविना अश्वघोषेण प्रणीतम् । एवं बौद्धधर्मदर्शनस्य महायानसम्बद्धः दार्शनिकोऽयं ग्रन्थः । अयं च ग्रन्थः महायानश्रद्धोत्पादशास्त्रसङ्ग्रह इति नाम्नापि ज्ञायते । दुर्भाग्यं वर्तते यत् इदानीमस्य ग्रन्थस्य मूलरूपं न प्राप्यते, तथापि चीनीभाषायां तु सुरक्षितोऽयं ग्रन्थः । अस्यैव पुनः आङ्ग्लभाषायामपि अनुवादः कृतो दृश्यते । तत्र जापानदेशस्य टी.सुजुकीमहोदयेन प्रथमं आङ्ग्लभाषायामनुदितो वर्तते । द्वितीयञ्च रिचर्डस्महोदयेन अनुदितः वर्तते (Nariman, 1920, पृ.39) । अस्मिन् ग्रन्थे विज्ञानवादस्य शून्यवादस्य च चर्चा क्रियते । एवं हीनयानसम्प्रदाये विद्यमानानां त्रुटीनां निराकरणाय अश्वघोषेण अस्य ग्रन्थस्य रचना कृता इति वक्तुं शक्यते ।

## सूत्रालङ्कारशास्त्रम्

सूत्रालङ्कारशब्दस्तु सूत्रस्यालङ्कार इति षष्ठीसमासे कृते निष्पद्यते । सूत्रालङ्कारशास्त्रं गद्यपद्यमिश्रितं वर्तते । अस्य ग्रन्थस्य मूलं तु संस्कृतभाषायामेवासीत् । अनन्तरं चीनीभाषायाम् अनुवादत्वेन सुरक्षितमिति । चीनीयात्रिणा इत्सिङ्गहोदयेन इदं शास्त्रम् अश्वघोषकृतमिति स्वीकृतं वर्तते । परन्तु ल्युडर्समहोदयेनेदं शास्त्रमश्वघोषकृतं नास्तीति उद्घोषितम् । अतः सूत्रालङ्कारशास्त्रविषये विदुषाम् ऐकमत्यं न दृश्यते । कल्पनामण्डितीकाग्रन्थस्तु सूत्रालङ्कारस्य अनुकृतिरूपो ग्रन्थः बुद्धचरितग्रन्थानान्तरमेव रचित इति ज्ञायते । यतोहि बुद्धचरितस्य बहूनि उद्धरणानि बहुत्र स्थलेषु दृश्यन्ते ग्रन्थेऽस्मिन् ।

## वज्रसूचीः वज्रसूच्युपनिषद् वा

ग्रन्थेऽस्मिन् वर्णव्यवस्थायाः सम्यक्रूपेणालोचनं कृतं दृश्यते । वज्रसूचीग्रन्थः अश्वघोषस्य कृतिरूपः नास्तीति केचन कथयन्ति । परन्तु बालगङ्गाधरतिलकमहोदयेन आर.एल.भीममहोदयेन चाश्वघोषस्यैव कृतिरियं स्वीकृता वर्तते । एतच्चास्य ग्रन्थस्य साङ्गोपाङ्गाध्ययनेन ज्ञातुं शक्यते ।

**राष्ट्रपालनाटकः**

अश्वघोषकृता कमनीयनाट्यकृतिरियं । किन्तु सम्प्रति अयं ग्रन्थः नोपलभ्यते । अस्य उल्लेखमात्रं प्राप्यते । बौद्धधर्मेषु जनानां कृते दीक्षितकरणायैवास्य ग्रन्थस्य रचना कृतेति आभाणकं वर्तते ।

**उर्वशीवियोगः**

राहुलसांकृत्यायनस्यानुसारेण अश्वघोषेण सर्वप्रथमं अस्यैव नाटकस्य रचना कृतेति । अस्य नाटकस्य नायिका उर्वशी आसीत् । इमं नाटकं दृष्ट्वा अथवा अस्य नाटकस्य आलोडनं कृत्वा सांकृत्यायनेन उक्तं वर्तते यत् संस्कृतवाङ्मये प्रथमः नाटककारः अयमेवाश्वघोष आसीदिति ।

**रूपकावशेषप्रथमः अथवा शारिपुत्रप्रकरणम्**

शारिपुत्रप्रकरणस्य नामान्तरं विद्यते शारद्वतिपुत्रप्रकरणमिति । अस्मिन् नाटके रसश्रृङ्गारस्य प्राधान्यं दृश्यते । एवञ्च हास्यरसस्य करुणरसस्यापि समावेशः द्रष्टुं शक्यते ।

**रूपकावशेषद्वितीयः**

इयं च नाट्यकृतिरन्यापेक्षया भिन्नास्ति । यद्यप्यस्य नाटकस्य सामग्र्यः इदानीं न प्राप्यन्ते । अस्मिन् नाटके सर्वेऽपि जनाः संस्कृतभाषायामेव व्यवहरन्तीति ।

**रूपकावशेषतृतीयः**

अस्य नाटकस्य प्रणेता महाकविः अश्वघोषः अस्ति । अस्मिन् नाटके प्राकृतभाषायां संस्कृतभाषायाञ्च व्यवहारः दृश्यते । अयं नाटकः मृच्छकटिकनाटकेन सह साम्यं दृश्यते ।

**गण्डीस्तोत्रगाथा**

महाकवेरश्वघोषस्य स्रग्धराछन्दे प्रणीतमिदमेकमेव गीतिकाव्यमस्ति । अत्र ग्रन्थे बुद्धस्य संस्तुतिः दरीदृश्यते । महाकवेः अन्यकृत्यपेक्षया इदं काव्यं सरलमस्ति । इत्सिङ्गहोदयेन स्वग्रन्थे अश्वघोषेणैवेदं काव्यं रचितमिति उक्तं वर्तते । बौद्धधर्मस्य धार्मिकसन्देशानां जनानां समक्षे प्रापयितुं महान् प्रयासः कृतः अश्वघोषेणेति ।

**बुद्धचरितमहाकाव्यम्**

इदञ्च बुद्धचरितमहाकाव्यमश्वघोषेण रचितं वर्तते । एवञ्च बुद्धभगवतः जीवनदर्शनेन सह सम्बद्धं वर्तते । अस्मिन् महाकाव्ये अष्टाविंशतिसर्गाः सन्ति । परन्तु दुर्भाग्यमेतत् वर्तते इदानीमस्य ग्रन्थस्य

संस्कृतभाषामुपलब्धिः नास्ति । संस्कृतभाषायामपि प्राप्तुं शक्यते परन्तु तत्र न अष्टाविंशतिसर्गाः अपितु सप्तदशसर्गा एव सन्ति । इदञ्च महाकाव्यं नेवारीलिप्यां सुरक्षितं दृष्ट्वानन्तरं पाण्डुलिपिमाधारीकृत्य जानस्टानमहोदयेन प्रकाशितम् । अस्य पाण्डुलिपेः सर्वप्रथमं हरप्रसादशास्त्रीमहोदयेन ज्ञातमासीत् । चीनदेशस्य यात्रिणा इत्सिङ्गहोदयेन उक्तं वर्तते यत् बुद्धचरितमहाकाव्यस्य प्रारम्भस्तु बुद्धस्य गर्भाधानादेव जातः । अन्यस्तु पुनः राज्ञः अशोकस्य वर्णानानन्तरमिति । हरप्रसादशास्त्रीमहोदयेन अस्य ग्रन्थस्य चतुर्दशसर्गाणामेव सम्पादनं कृतमासीत् । कालान्तरमस्य महाकाव्यस्य अध्ययनमध्यापनञ्चानेकैः विद्वद्भिः आंशिकरूपेण कृतं कारितं वा । भगवता बुद्धेन प्राणिमात्रं प्रति कीदृशः व्यवहारः कृत आसीत्, तत् सर्वमपि अस्मिन् ग्रन्थे सम्यक्रूपेण प्रतिपादितं दरीदृश्यते । अस्मिन् च महाकाव्ये भगवतः बुद्धस्य जीवनवृत्तापेक्षया उपदेशानां तत्सिद्धान्तानां चाधिकं वर्णनं वर्तते । बुद्धचरितस्य काव्यकलादृष्ट्या पञ्चम–अष्टम–त्रयोदशसर्गाः अत्यन्तं रमणीयाः महत्वपूर्णाश्च दरीदृश्यन्ते । अवशिष्टेषु सर्गेषु दार्शनिकविचाराणाम्, धार्मिकविचाराणाञ्च विश्लेषणं दृश्यते । काव्यशास्त्रेषु वर्णितं यत् काव्यलक्षणं तद्गुणानाञ्च समन्वयः अस्मिन् बुद्धचरितमहाकाव्ये प्राप्तुं शक्यते (दण्डी, सन् १९८८, १।१४) । सम्पूर्णमिदमहाकाव्यं भगवतः बुद्धस्य विषय एव परिभ्रमति । अस्य महाकाव्यस्य नायिका यशोधरा वर्तते । सा च यशोधरा आदर्शनारी, साध्वी, विनयवती, सुन्दरकायवती चासीत् इति प्रतिपादितम् । उक्तञ्च बुद्धचरिते–

> कुलात्ततोऽस्मै स्थिरशीलयुक्तात् साध्वीं वपुर्हीविनयोपपन्नम् ।
> यशोधरां नाम यशोविशालां वामाभिधानां श्रियमाजुहाव ॥ (बुद्धचरितमहाकाव्यम्, २।२६)

अस्मिन् महाकाव्ये यद्यपि युद्धस्य वर्णनं न दृश्यते, तथापि कविना त्रयोदशसर्गे द्वन्द्वस्य वर्णनं कृत्वा युद्धस्य पूर्तिरपि कृता । चीनीयात्रिणा इत्सिङ्गहोदयेनास्य महाकाव्यस्य प्रशंसा कृता वर्तते ।

**सौन्दरनन्दमहाकाव्यम्**

सौन्दरनन्दमहाकाव्यं महाकवेरश्वघोषस्य द्वितीयं वर्तते । अस्मिन् महाकाव्ये अष्टादशसर्गाः सन्ति । अस्य महाकाव्यस्य प्राचीनहस्तलिखितं पत्रमपि प्राप्यते । तच्च भागद्वयं वर्तते । परन्तु सम्प्रति अस्य महाकाव्यस्य हस्तलिखितं प्राचीनपत्रं नोपलभ्यते । सम्प्रति यदुपलभ्यते तच्च पठनायातिदुष्करं दरीदृश्यते । एतच्च प्रतिद्वयं नैपालस्य महाराज्ञः पुस्तकालये सुरक्षितं वर्तते । हरप्रसादशास्त्रिमहोदयेन च १८९८ईशवीयशताब्द्यामस्य ग्रन्थस्यावलोकनं कृतमिति । अनन्तरं पुनः १९३९ईशवीयशताब्द्यां बङ्गालदेशात् नवीनं संस्करणं प्रकाशितम् । इतः पूर्वं जीर्णावस्थायामेवासीदयं ग्रन्थः । बी.सी.लाहामहोदयेन १९२२ ईशवीयशताब्द्यां बङ्गालीभाषायामनुवादः कृतः । अस्मिन् महाकाव्ये भगवतो बुद्धस्योपदेशानां सम्यक्तया चर्चा परिचर्चा च द्रष्टुं शक्यते । एवञ्च निर्वाणं कथं प्राप्तुं शक्यते, एतद्विषय उपाया अपि प्रदर्शिताः सन्ति । अत्र स्वभार्योपरि कथम् अशक्तः सञ्जात इत्यादिविषयेऽपि चर्चा वर्तते । यथोक्तम्–

> स चक्रवाक्येनहि चक्रवाकस्तया समेतः प्रियया प्रियार्हः ।
> ना चिन्तयद्वैश्रमणं न शक्रं तस्थानहेतोः कुत एव धर्मम् ॥ (सौन्दरनन्दमहाकाव्यम्,४।२)

एकस्याभावे अन्यस्य जीवनं यापयितुमसम्भवं प्रतीयते । सांसारिकविषयेभ्यः दूरीकृत्य आध्यात्मिकजीवनस्य प्राप्तिः कथं भवतीत्यस्य महाकाव्यस्योद्देश्यं वर्तते । अस्मिन् महाकाव्ये नन्दस्य सुन्दर्याश्च प्रेमप्रसङ्गः वर्णितो विद्यते । प्रेमप्रसङ्गे श्रृङ्गाररसः द्रष्टुं शक्यते । पुनः एतयोः वियोगोऽपि प्रतिपादितः अस्मिन् ग्रन्थे । वियोगप्रसङ्गे तु विप्रलम्बश्रृङ्गारः वर्तते । अस्य महाकाव्यस्य उत्तरार्धे प्रायशः दार्शनिकविचराणामेव वर्णनं वर्तते । महाकविना अश्वघोषेण चित्तशान्त्यर्थम् एव अस्य ग्रन्थस्य रचना कृता । अस्य चीनीभाषायां तिब्वतीभाषायाञ्चानुवादः न प्राप्यते । अस्य महाकाव्यस्य रचना बुद्धचरितग्रन्थानन्तरमेव कृता । अस्मिन् महाकाव्ये दर्शनानां काव्यानाञ्च सम्मिश्रणं दृश्यते ।

**महाकवेरश्वघोषस्य उपाधयः अलङ्काराश्च**

सम्राट् कनिष्कः भगवतो बुद्धस्य अत्यन्तं प्रशंसां करोति स्म । बौद्धधर्मस्य प्रचाराय महान् प्रयत्नः कृतः । अनेन बौद्धधर्मस्वीकाराय मगधदेशीयः नरेशः प्रेरित इति । तदर्थमेव अश्वघोषः पुरुषपुरनगरे (सम्प्रति पेशावरनगरे) आहुतः । चीनीस्रोतानुसारेण अश्वघोषः कनिष्कस्य आध्यात्मिकगुरुः उपदेष्टा चासीदिति । एवञ्च चरकः कनिष्कस्य वैद्य आसीदीति ज्ञायते । राज्ञा कनिष्केन पुण्यादित्योपाधिना पुण्यश्री–उपाधिना च अलङ्कृतोऽयं अश्वघोषः (लाहा, सन् १९४६, पृ.३) । त्रिपिटकग्रन्थोपरि अनेन अश्वघोषेण दार्शनिकं प्रवचनं कृतम् । आन्वीक्षिकी–त्रयी–वार्ता–दण्डनीति–आर्तविद्याभिः प्रमाणमुपस्थाप्य प्रवचनं ददाति स्म जनेभ्यः । चीनीयात्रिणा इत्सिङ्गहोदयेन उक्तं वर्तते यत् अश्वघोषकाले तस्य कृतीनां सश्रद्धया पठनं पाठनञ्च भवति स्म । तारानाथमहोदयेन त्रयः अश्वघोषा आसन् इति उक्तम् । अश्वघोषस्य श्रद्धोत्पादशास्त्रोपरि नागार्जुनेन व्याख्या कृता वर्तते । तत्र च व्याख्यायामश्वघोषः विभिन्नकाले विद्यमान आसीदिति वर्णनं दृश्यते । एवञ्च स्वव्याख्यायां नागार्जुनेन अश्वघोषस्य शिष्योऽहमित्युक्तं वर्तते । एतत् सर्वं सूक्ष्मतया चिन्त्यते चेत् अश्वघोषस्य विषये यानि मतानि प्राप्यन्ते, तेषु मतेषु किं प्रामाणिकम् इति वक्तुं न शक्यते । अश्वघोषेण बौद्धधर्मोपरि आगतानां दोषाणां निर्मूलतया निराकरणं कृत्वा बौद्धधर्मस्य प्रचाराय प्रसाराय च महान् यत्नः विहितः । एतावता अश्वघोषः राज्ञः कनिष्कस्य समय एवासीदीति ज्ञायते ।

**महाकवेरश्वघोषस्य दार्शनिकः सम्प्रदायः**

महाकविरश्वघोषः बौद्धधर्मस्य कस्मिन् सम्प्रदाय आसीत् इति विषये तु विदुषाम् ऐकमत्यं नास्ति । केषाञ्चन विदुषां मतं वर्तते यत् अयमश्वघोषः महायानसम्प्रदायस्य तत्सिद्धान्तस्य च प्रचारक आसीदिति । महायानश्रद्धोत्पादशास्त्रस्य सिद्धान्तस्तु महायानस्य सिद्धान्तेन सह मिलति । अतः अयमश्वघोषः महायानसम्प्रदायस्यास्तीति । तिब्वतीपरम्परायां सर्वास्तिवादित्वेन स्वीक्रियते । एतेन अश्वघोषः हीनयानसम्प्रदायस्य वर्तत इति ज्ञायते (उपाध्यायः, सन् १९८९, पृ.४५) । केचन विद्वांसस्तु अश्वघोषः योगाचारसम्प्रदायस्य आसीदिति कथयन्ति । कुतः इति प्रश्ने महाकाव्ये योगाचारशब्दस्य प्रयोगदर्शनात् । यथोक्तम्–

योगाचारस्तथाहारं शरीराय प्रयच्छति ॥
तथा योगाचारो निपुणमिह दोषव्यवहितम् ।
विशोध्य क्लेशेभ्यः शययति मनः संक्षिपति च ॥ (सौन्दरनन्दमहाकाव्यम्,१५।६८)

अर्थात् योगेषु कृताभ्यासः जनः दोषायुक्तचित्तस्य शुद्धिकरणाय समर्थः भवति। चीनीस्रोतानुसारेणायमश्वघोषः सर्वास्तिवादी आसीत् । अयं च अश्वघोषः विभाषासिद्धान्तस्यापि ज्ञाता आसीत् । विभाषासिद्धान्तस्य सौन्दरनन्दमहाकाव्येऽपि चर्चा दृश्यते। सौन्दरनन्दमहाकाव्ये श्रद्धायाः महत्त्वं प्रतिपादितं वर्तते। यथोक्तम् –

श्रद्धाङ्करमिमं तस्मात्संवर्धयितुमर्हसि।
तद् वृद्धौ वर्धते धर्मो मूलवृद्धौ यथा द्रुमः ॥ (सौन्दरनन्दमहाकाव्यम्,१२।४१)

श्रद्धायाः चर्चा पूर्वकालीनेषु महायानसूत्रेषु प्राप्यते । इयं श्रद्धा बुद्धं प्रति भक्तिमुत्पादयति । अस्याः श्रद्धायाः सर्वास्तिवादसिद्धान्ते न किमपि महत्त्वं वर्तते। डा.एस.एन.दासगुप्तमहोदयेन, एस.के.डेमहोदयेन चोक्तं वर्तते यत् अयं महाकविः अश्वघोषः महासाङ्घिकसम्प्रदायस्य उत बहुश्रुतिकसम्प्रदायस्य अनुयायी आसीदिति । जानस्टानमहोदयेन प्रश्नः कृतः वर्तते यदयमश्वघोषः कस्मिन् सम्प्रदाय आसीदिति। यद्यपि जानस्टानमहोदयेन हीनयानसम्प्रदायस्य अस्त्ययम् अश्वघोष इति स्वीकृतः । कुत्रचन बहुश्रुतिकसम्प्रदाये अस्य प्रभावः महान् आसीदिति वर्ण्यते। परन्तु इदमित्थमिति कथनन्तु न केनापि विदुषा कृतम्। तिब्वतीपरम्परायाः प्रचारसमये महासांघिकानां पञ्चसिद्धान्तानां वर्णनं दृश्यते। तत्र च सिद्धान्तेषु वास्तविकं निर्वाणं कथं प्राप्तुं शक्यते, तत् प्राप्त्यर्थमुपायः कः ?इत्यादिविषये सम्यक्तया चर्चा कृता दृश्यते । बहुश्रुतिकस्य महासांघिकस्य च विषये जानस्टानमहोदयस्य तर्कः निर्बलो दृश्यते। महादेवस्य पञ्चानां तर्काणां स्वीकरणं तु महासांघिकसम्प्रदायस्य वैशिष्ट्यं वर्तते ।एतावता अस्माभिः ज्ञातुं शक्यते यत् अन्ततः अश्वघोषः हीनयानी महायानी चासीत् । अश्वघोषस्य कृतिविषये, जीवनविषये, कालविषये, उपाधिविषये, दार्शनिकसम्प्रदायविषये च अनेकानां विदुषां मतं प्रदर्शितम् । तत्र च विशेषतः तारानाथ–जानस्टान–जानसन्–टी.सुजुकी–हरप्रसादशास्त्रि–इत्सिङ्–राहुलसांकृत्यायनादिभिः विद्वद्भिः स्वस्वमतं प्रतिपादितम्। एतावता महकवेरश्वघोषस्य जीवनवृत्तं तत्कृतीनां परिचयश्च प्रस्तुत इति दिक्।

## निष्कर्षः

महाकवेरश्वघोषस्य जीवनवृत्तविषये चीनतिब्बतादिषु बौद्धदेशेषु पर्याप्तरूपेण सामग्र्यः प्राप्यन्ते । महाकवेरश्वघोषस्य जीवनवृत्तमाधारीकृत्य रचितस्य सौन्दरनन्दमित्यस्य ग्रन्थस्य अवलोकनेन ज्ञायते यत् अयं महाकविः अश्वघोषः महावादी–महापण्डित–महाराजेत्यादिभिः उपाधिभिः अलङ्कृत इति । एवञ्च अयं साकेतप्रदेशस्य निवासी । महाकवेरश्वघोषस्य कृतिषु मध्ये बुद्धचरित–सौन्दरनन्द–बज्रसूचीप्रभृतयः ग्रन्थाः सर्वोत्कृष्टाः विद्यन्ते। केषाञ्चन विदुषां मतं वर्तते यत् अयमश्वघोषः महायानसम्प्रदायस्य तत्सिद्धान्तस्य च प्रचारक आसीदिति। तिब्वतीपरम्परायां सर्वास्तिवादित्वेन स्वीक्रियते। एतेन अश्वघोषः हीनयानसम्प्रदायस्य वर्तते इति ज्ञायते। अयञ्च अश्वघोषः ईशायाः प्रथमशताब्द्यामासीदिति विदुषां मतैक्यं वर्तते। अश्वघोषस्य

साहित्यिकं पाण्डित्यं बौद्धदर्शनज्ञानं चातीव गभीरमासीत् । तत्कालप्रचलितानां नीतिशास्त्रकौटिल्यार्थशास्त्रवैद्यकादीनां ज्ञानेन सह व्याकरणस्य विस्तृतं ज्ञानं तेन रक्ष्यते स्म । तदीयं बौद्धदर्शनज्ञानं तु नितान्तं सबलमासीत् । अश्वघोषस्य कृतिमादायानन्तरकालिकैः कविभिः नैकविधकाव्यानि रचितानि सन्ति । अश्वघोषेण बौद्धदर्शनस्य विकासाय महान् यत्नः कृतः । एतावता बौद्धदर्शनविकासाय महाकवेरश्वघोषस्य योगदानं तत्कृतीनाञ्च वैशिष्ट्यं प्रतिपादितमिति दिक् ।

## कृतज्ञताज्ञापनम्

अस्मिन् आलेखे बौद्धदर्शनविकासाय अश्वघोषाचार्यस्ययोगदानविषयकचिन्तने, कृत्यादिविश्लेषणक्रमे, सैद्धान्तिकविषयनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विषयविज्ञेभ्यो विद्वद्भ्यो धन्यवादं निवेदयन् हार्दिकीं कृतज्ञतां व्यनज्मि ।

## सन्दर्भगन्थसूची

अश्वघोषः, (सन् २०००). *बुद्धचरितम्*, सूर्यनारायणचौधरी (अनु.), मोतीलालबनारसीदासः ।

अश्वघोषः, (२०६०). *बुद्धचरितम्,* द्वारिकादासशास्त्री (अनु.), चौखम्बासंस्कृतसीरीज–आफिस ।

अश्वघोषः, (२०२५). *बुद्धचरितम्,* विश्वनाथशर्मा भट्टराईः (अनु.), ने.रा.प्र.प्र. ।

अश्वघोषः, (सन् १९५८). *सौन्दरनन्दमहाकाव्यम्,* सूर्यनारायणचौधरी (अनु.), संस्कृतभवनम् ।

उपाध्यायः,बलदेवः (सन् १९८९). *बौद्धदर्शनमीमांसा,* चौखम्बाविद्याभवनम् ।

उपाध्यायः, भरतसिंहः (सन् १९५४).*बौद्धदर्शन एवं अन्य भारतीय दर्शन,*बंगालहिन्दीमहलः ।

तिवारी, सञ्जयकुमारः (सन् २००२).*बुद्धचरित एक अध्ययन,*ईष्टर्न–बुक–लिंकर्स ।

मनुः,*मनुस्मृतिः* (सन् २०१३). शिवराजाचार्यः कौडिन्यायनः (व्या.),चौखम्बाविद्याभवनम् ।

लाहा, विमलचरणः (सन् १९४६).*अश्वघोष*, रोयल–एसियाटिका–सोसाइटी–अफ्–बंगाल ।

सांकृत्यायनः, राहुलः (सन् १९६६). *वोल्गा से गंगा,* किताब महल ।

Bapat, P.V. (1997).*2500 Years of Buddhism.* Ministry of Information and Boardcasting, Government of India.

Johnston, E.H (1992).*Act of Buddha,* Motilal Banarasidas.

Nariman, (1920). *Literary History of Sanskrit Buddhism,* Bombay.

Suzuki, (Tr.) (1900). *Asvaghosha's Discourses in the awakehing of the faith in the Mahayana,*Shraddhotpada Shastra, Chicago.